कृतावग्रन्थिको यस्तु प्रौढ़पादः स उच्यते" ॥)

कृतिः, स्त्री, (कृ + भावे क्तिन् ।) करणम् । हिंसा । इति मेदिनी ॥ (पुरुषप्रयत्नः । कर्त्तृव्यापारः । क्रिया । यथा, मुग्धबोधे ।
"जगतां कारकः कृष्णः कृतिर्मुररिपोरियम्" ॥
पुं, ऋषिविशेषः । यथा, विष्णुपुराणे । ३ । ६ । ७ ।
"हिरण्यनाभशिष्यास्तु चतुर्विंशतिसंहिताः ।
प्रोवाच कृतिनामासौ शिष्येभ्यः स महामतिः" ॥
नृपभेदः । यथा, मार्कण्डेयपुराणे । ८ । २१ ।
"सप्ताश्वमेधानाहृत्य राजसूयञ्च पार्थिवः ।
कृतिर्नाम च्युतः स्वर्गात् असत्यवचनात् सकृत्" ॥
स तु जनकवंशजातः । यथा, भागवते । ९ । १३ । २६ ।
"बहुलाश्वो धृतेस्तस्य कृतिरस्य महाबलः" ॥
विंशत्यक्षरपादकच्छन्दोभेदः ॥ यथा, "कृतिः प्रकृतिराकृतिः" ॥ विंशतिसङ्ख्या । कर्त्तनी । यथा, ऋग्वेदे । १ । १६८ । ३ ।
"ऐषामंसेषु रम्भिणीव रारभे
हस्तेषु खादिश्च कृतिश्च सन्दधे" ॥
विष्णुः । यथा, महाभारते । १३ । १४९ । २२ ।
"अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्" ॥)

कृतिकरः, पुं, (कृतिसङ्ख्याः विंशतिसङ्ख्याः करा यस्य ।) रावणः । इति शब्दमाला ॥

कृती, [न्] त्रि, (कृतं कर्म्म प्रशस्तमस्यास्तीति । अत इनिः ।) निपुणः । पण्डितः । इत्यमरः । ३ । १ । ४ ॥ साधुः । पुण्यवान् । इति शब्दरत्नावली ॥ (कृतक्रियः । यथा, रघौ ३ । ५१ ।
"गृहाण शस्त्रं यदि सर्ग एष ते
न खल्वनिर्जित्य रघुं कृती भवान्" ॥)

कृत्तं, त्रि, (कृती श प् छिदि + क्तः ।) छिन्नम् । वेष्टितम् । इति हेमचन्द्रः ॥

कृत्तिः, स्त्री, (कृत्यते इति । कृत् + कर्म्मणि क्तिन् ।) कृष्णसारादिचर्म्म । इत्यमरः । २ । ७ । ४७ ॥
(यथा, महादेवध्याने ।
"समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्" ॥)
त्वक् । भूर्जः । कृत्तिकानक्षत्रम् । इति मेदिनी ॥

कृत्तिका, स्त्री, (कृन्तति उग्रत्वात् । कृत् + "कृतिभिदिलतिभ्यः कित्" । उणां ३ । १४७ । इति तिकन् किच्च ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गततृतीयनक्षत्रम् । तत्पर्य्यायः । बहुला २ अग्निदेवा ३ । इति हेमचन्द्रः ॥ तस्या रूपम् । अग्निशिखाकृतिषट्तारकामयम् । इति कालिदासः । क्षुरनिभषट्तारामयम् । इति केचित् । तस्या अधिष्ठात्री देवता अग्निः । सा तु मिश्रगणान्तर्गता । इति दीपिका ॥ तत्र जातस्य फलम् ।
"क्षुधाधिकः सत्यधनैर्व्विहीनो
वृथाटनोत्पन्नमतिः कृतघ्नः ।
कठोरवाक् गर्हितकर्म्मकृत् स्यात्
चेत् कृत्तिकायां मनुजः प्रसूतः" ॥
इति कोष्ठीप्रदीपः ॥

कृत्तिकाभवः, पुं, (कृत्तिकायाः भवोऽस्य ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (कृत्तिकाधवः । इति केचित् ।)

कृत्तिकासुतः पुं, (कृत्तिकायाः सुतः तया पालितत्वात् ।) कार्त्तिकेयः । इति हेमचन्द्रः ॥

कृत्तिवासः, पुं, (कृत्त्या गजासुरचर्म्मणा वस्ते स्वकटिदेशं आच्छादयति यः । वस् आच्छादने + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शिवः । इति द्विरूपकोषः ॥

कृत्तिवासाः, [स्] पुं, (कृत्तिर्गजासुरस्य चर्म्म वासोऽस्य ।) शिवः । इत्यमरः । १ । १ । ३३ ॥
(यथा च महादेवस्य चर्म्मवसनत्वं जातं तथा काशीखण्डे ६४ अध्याये वर्णितं यथा,—
"कोलाहलो महानासीत् त्राहि त्राहीति सर्व्वतः ।
महिषासुरपुत्रोऽसौ समायाति गजासुरः ॥
प्रमथ्नन् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः ।
यत्र यत्र धरायां स चरणं प्रमिणोति हि ॥
अचलत्वात् दोलयाचक्रे तत्र तत्रास्य भारतः ।
उरुवेगेन तरवः पतन्ति शिखरैः सह ॥
तस्य दोर्दण्डवातेन चूर्णाः स्युश्च शिलोच्चयाः ।
यस्य मौलिजसंघर्षात् घना व्योम त्यजन्त्यलम् ॥
नीलिमानं न चाद्यापि जह्यस्तत्केशसङ्गजम् ।
यस्य निःश्वाससम्भारैरुत्तरङ्गा महाब्धयः ॥
नद्योऽप्यमन्दकल्लोला भवन्ति तिमिभिः सह ।
योजनानां सहस्राणि नव यस्य समुच्छ्रयः ॥
तावानेव हि विस्तारस्तनोर्मायाविनोऽस्य हि ।
यन्नेत्रयोः पिङ्गलिमा तथा तरलिमा पुनः ॥
विद्युता नोज्झितेऽद्यापि सोऽयमायाति सत्वरः ।
यां यां दिशं समभ्येति सोयं दुःसहदानवः ॥
नाद्य समीभवेदस्य साध्वसादिव दिग्भयम् ।
ब्रह्मदत्तवरश्चायं तृणीकृतजगत्त्रयः ॥
अवध्योऽहं भवामीति स्त्रीपुंभिः कामनिर्जितैः ।
ततस्त्रिशूलहेतिस्तमायान्तं दैत्यपुङ्गवम् ॥
विज्ञायावध्यमन्येन शूलेनाभिजघान तम् ।
प्रोतस्तेन त्रिशूलेन स च दैत्यो गजासुरः ॥
छत्रीकृतमिवात्मानं मन्यमानो जगौ हरम् ॥
गजासुर उवाच ।
त्रिशूलपाणे ! देवेश ! जाने त्वां स्मरहारिणम् ।
तव हस्ते मम वधः श्रेयानेव पुरान्तक ! ।
किञ्चिद्विज्ञप्तुमिच्छामि अवधेहि ममेरितम् ॥
सत्यं ब्रवीमि नासत्यं मृत्युञ्जय ! विचारय ।
त्वमेको जगतीवन्द्यो ! विश्वस्योपरि संस्थितः ॥
अहं त्वदुपरिष्टाच्च स्थितोऽस्मीति जितं मया ।
धन्योऽस्म्यनुगृहीतोऽस्मि त्वत्त्रिशूलाग्रसंस्थितः ॥
कालेन सर्व्वैर्मर्त्तव्यं श्रेयसे मृत्युरीदृशः ।
इति तस्य वचः श्रुत्वा देवदेवः कृपानिधिः ।
प्रोवाच प्रहसन् शम्भुर्घटोद्भव गजासुरम् ॥
ईश्वर उवाच ।
गजासुर ! प्रसन्नोऽस्मि महापौरुषसेवधे ! ।
स्वानुकूलं वरं ब्रूहि ददामि समतेऽसुर ! ॥
इत्याकर्ण्य स दैत्येन्द्रः प्रत्युवाच महेश्वरम् ॥
गजासुर उवाच ।
यदि प्रसन्नो दिग्वासस्तदा नित्यं वसान मे ।
इमां कृत्तिं विरूपाक्ष ! त्वत्त्रिशूलाग्निपाविताम् ।
सुप्रमाणां सुखस्पर्शां रणाङ्गणपवीकृताम् ।
इष्टगन्धिः सदैवास्तु सदैवास्त्वतिकोमला ।
सदैव निर्म्मला चास्तु सदैवास्त्वतिमङ्गलम् ॥
महातपानलज्वालां प्राप्यापि सुचिरं विभो ! ।
न दग्धा कृत्तिरेषा मे पुण्यगन्धनिधिस्ततः ॥
यदि पुण्यवती नैषा मम कृत्तिर्दिगम्बर ! ।
तदा त्वदङ्गसङ्गोऽस्याः कथं जातो रणाङ्गने ॥
अन्यच्च मे वरं देहि यदि तुष्टोऽसि शङ्कर ! ।
नामास्तु कृत्तिवासास्ते प्रारभ्याद्यतनं दिनम् ॥
इति तस्य वचः श्रुत्वा तथेत्युक्त्वा च शङ्करः ।
पुनः प्रोवाच तं दैत्यं भक्तिनिर्म्मलमानसम् ॥
ईश्वर उवाच ।
शृणु पुण्यनिधे ! दैत्य ! वरमन्यं सुदुर्लभम् ।
अविमुक्ते महाक्षेत्रे त्यक्तकलेवर ! ॥
इदं पुण्यशरीरं ते क्षेत्रेऽस्मिन् मुक्तिसाधने ।
मम लिङ्गं भवत्वत्र सर्व्वेषां मुक्तिदायकम् ॥
कृत्तिवासेश्वरं नाम महापातकनाशनम् ।
सर्व्वेषामेव लिङ्गानां शिरोभूतमिदं वरम् ॥
यावन्ति सन्ति लिङ्गानि वाराणस्यां महान्त्यपि ।
उत्तमं तावतामेतदुत्तमाङ्गवदुत्तमम्" ॥ * ॥
यदि चात्र गजासुरचर्म्मणाच्छादकत्वं वर्णितं तथापि काव्यावस्थाविशेषेण व्याघ्रचर्म्मणाप्यस्य परिधेयकत्वं दृश्यते यथा व्याघ्रकृत्तिं वसानमिति ध्यानादौ स्फुटमेव वस्तुतस्तु नचैतत् वाह्यचर्म्मादिविषय एव ग्रन्थकारेण भगवता महर्षिणा वर्णितः त्रिगुणात्मिका प्रकृतिरेव तस्याच्छादिका इति आध्यात्मिकी स्वरूपोक्तिः । यथा, "गुणमयी मायैषा वावह तस्य परमस्य आच्छादनी" । व्याघ्रहस्त्यादेरुक्तिस्तु मायाया वैचित्र्यप्रदर्शनायैव । अपि च कटिदेशपर्य्यन्तोक्तिरेकपाद एव मायाच्छादितत्वात् । यथा, श्रुतिः ।
"पादोऽस्य विश्वाभूतानि त्रिपादोऽस्ति स्वयंप्रभः" ॥)

कृत्नुः, त्रि, (कृ + "कृहनिभ्यां क्त्नुः" । उणां ३ । ३० । इति क्त्नुः ।) शिल्पी । इत्युणादिकोषः ॥ (यथा,— ऋग्वेदे १ । ९२ । १० । "श्वघ्नीव कृत्नुर्विज आमिनाना मर्त्तस्य देवी जरयन्त्यायुः" ॥)

कृत्यं, क्ली, (कृ + "विभाषा कृवृषोः" । ३ । १ । १२० । इति क्यप् तुगागमश्च ।) कार्य्यम् ।
(यथा, गोः रामायणे ३ । ६० । २७ ।
"तथा स राक्षसीरुक्त्वा राक्षसेन्द्रः प्रतापवान् ।
निष्क्रम्यान्तःपुरात्तस्थौ किं कृत्यमिति चिन्तयन्" ॥)
प्रयोजनम् । इति हेमचन्द्रः ॥

कृत्यः, त्रि, (कृ + क्यप् तुगागमश्च ।) विद्विष्टः । इति मेदिनी ॥ धनादिभिर्भेद्यः । इति जटाधरः ॥ प्रत्ययविशेषः । यथा,—
"कृत्याः षट् ते समाख्याताः क्यप्ण्यतौ भावकर्म्मणोः ।
तव्यानीयावनन्ताद्यस्त्वेलिमः कर्म्मकर्त्तरि" ॥
इति सुपद्मसम्मता कारिका ॥ कर्त्तरि कर्म्मणि चार्थे विहिताः कृत्या वाच्यलिङ्गाः स्युः । कृत्याल्यादयः वोपदेवमते "ते ल्याः" "क्तल्योः कभावे" इत्युक्तेः क्वचित् कृत्याः कर्त्तर्य्यपि स्युः । कर्त्तरि यथा भव्यस्त्वं भव्या लता भव्यं वनम् । कर्म्मणि यथा, ग्रामो गन्तव्यः नगरी गन्तव्या पुरं गन्तव्यम् ।